दिनाङ्क :- 03.04.2026

प्रात: - 06:55

## प्रधानमन्त्री-विधेयकः

लोकसभायां षड्विंशत्यधिक द्विसहस्रतम वर्षस्य जन-विश्वास (प्रावधानानां संशोधन) विधेयकस्य पारितेन देशे जीवनस्य सुगमतायै, व्यापारस्य सुगमतायै च महती प्रोत्साहनं भविष्यति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। सामाजिकान्तर्जालीये सन्देशे प्रधानमन्त्री अवदत् यत् एतत् विश्वास-आधारितां संरचनां सुदृढाम् करोति नागरिकान् सशक्तीकरोति तथा च अप्रचलितान् नियमान् विनियमान् च निष्कासयति। श्रीमोदिना उक्तं यत् एतेन प्रकरणानां शीघ्रसमाधानं सुनिश्चितं भविष्यति तथा च अपराधमुक्तीकरणस्य माध्यमेन विवादानां भारोपि न्यूनी भविष्यति। सः अग्रे अवदत् यत् विधेयकस्य प्रारूपणे स्वीकृतः परामर्शीयः उपागमः नवीनः अस्ति, ते सर्वे स्वस्य अन्तर्दृष्टेः योगदानाय संसदि अनुमोदनस्य समर्थनाय च प्रशंसनीयाः सन्ति।

## प्रधानमन्त्री-उपप्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना रशियादेशस्य प्रथमउपप्रधानमन्त्रिणा डेनिस् मन्टुरोव् इत्यनेन सह दिल्लीनगरे मेलनं कृतवान्। उभौ व्यापार, उर्वरक, सम्पर्क, क्षेत्रेषु जनानां परस्पर-सम्बन्धेषु परस्परम् लाभप्रदं सहयोगेषु च चर्चितवन्तौ। गतदिने समजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् दिसम्बर्-मासे राष्ट्रपत्युः पुतिन-वर्यस्य भारतयात्रायाः समये आयोजितस्य त्रयोविंशति-तमस्य भारत-रशिया वार्षिक-शिखरसम्मेलने प्राप्तानां परिणामानां कार्यान्वयनार्थं उभयोः पक्षयोः निरन्तरप्रयासानां स्वागतम् अस्ति।

ज्ञानेश-कुमारः मालदा-प्रकरण

मुख्य-निर्वाचन-आयुक्तः ज्ञानेश-कुमारः मालदा-प्रकरणस्य अन्वेषणं राष्ट्रिय-अन्वेषण-अभिकरणाय समर्पितवान्। एन्. आई. ए. दलम् अद्य पश्चिमवङ्गप्रदेशं प्राप्स्यति। सर्वोच्चन्यायालयेन मालदा-मण्डले एस्. आई. आर.-अभ्यासे संलग्नाः सप्त न्यायिक-अधिकारिणः बन्धकरूपेण ग्रहणं गम्भीरतया लक्षितम्। न्यायालयः एतत् निन्दनीयम् अमन्यत, राज्यस्य गृहसचिवात्, आरक्षि-महानिदेशकात्, अन्येभ्यः अधिकारिभ्यः च तेषां निष्क्रियतायाः विषये प्रतिक्रियां याचितवान्।

ट्रम्प - बोण्डी

अमेरिकादेशस्य राष्ट्रपतिना डोणाल्ड् ट्रम्पेन स्वस्य महान्यायवादिनं पाम् बोण्डी इत्यमुं निष्कासितम्। सः ट्रुथ सामाजिक-पटलीय सन्देशे एतत् घोषितवान्। तस्य स्थाने उप-महान्यायवादी टोड् ब्लैन्च इत्येषः कार्यभारं स्वीकरिष्यति। बोण्डी इत्यनेन जेफ़्री एप्स्टीन् इत्यनेन सम्बद्धानां पत्राणां विमोचनेन राष्ट्रपतिः ट्रम्पः अप्रसन्नः आसीत् इति कथ्यते। सः अवदत् यत् बोण्डी निजीक्षेत्रे अत्यन्तं आवश्यकं महत्त्वपूर्णं च नूतनं कार्यं प्रति परिवर्तयिष्यति।

गुट्टरेस - युद्धविराम

संयुक्तराष्ट्रसङ्घस्य महासचिवः एन्टोनियो गुट्टरेसः पश्चिम-एशिया-द्वन्द्वस्य शान्तियुतसमाधानाय आह्वानम् अकरोत्। सः अवदत् यत् अमेरिका इस्रेल्-देशयोः च कृते अपरिमितां मानवानां क्लेशान् जनयमानं, विनाशकारि-आर्थिक-परिणामान् जनयमानं च युद्धं स्थगयितुं इदमेव उचितः कालः अस्ति। सः इरान-देशम्

एशियादेशानाम् उपरि आक्रमणं न कर्तुम् अपि उक्तवान्। एकस्मिन् ट्वीट सन्देशे सः अवदत् यत् यदा नेतारः विनाशस्य अपेक्षया संवादस्य चयनं कुर्वन्ति तदा सङ्घर्षाः समाप्ताः भवन्ति। सः अवदत् यत् विकल्पः अद्यापि अस्ति, तत् अधुना एव करणीयम्।

<u>रक्षामंत्री - आई. गोम</u>

रक्षामंत्री राजनाथसिंहः नवदिल्ल्यां अनौपचारिक-मन्त्रि-समूहस्य (आई. गोम) इत्यस्य द्वितीय-सभायाः अध्यक्षतां कृतवान्। एकस्मिन् सामाजिकान्तर्जालीये सन्देशे, श्रीसिंहः परिस्थित्याः चतुर्विंशति होरासु निरीक्षणस्य महत्त्वं अधोरेखितवान्, तथा च सः कस्यापि आकस्मिकतायाः निवारणार्थं क्रमबद्धरूपेण प्रतिक्रियां दातुम् आवश्यकतायां बलं प्रदत्तवान्। मन्त्रिणा सूचितं यत् वर्तमानस्य पश्चिम-एशिया-द्वन्द्वस्य परिप्रेक्ष्ये सर्वकारेण कृताः उपायाः आई.गोम. समूहाय सूचिताः ।

<u>इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्</u>

इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्-क्रीडासु कोलकाता-नगरस्य ईडन-गार्डन्स् इत्यत्र सन् राईजर्स-हैदराबाद-दलेन कोलकाता-नाईट-राईडर्स्-दलं पञ्चषष्ठी धवनाङ्कैः पराजितम्।